• गुर्जरधरे ! विभासि •

स्वर्णिम गुजरात

१९६०-२०१०



श्रीसोमनाथसंस्कृतयुनिवर्सिटी

वेरावलम् - गुजरातम्

।। गुर्जरधरे ! विभासि ।।

प्रेरणामूर्तयः

श्रीकुलपतिवर्याः

प्रॉ. पङ्कज एल. जानीजीमहाभागाः

प्रकाशनम्

श्रीसोमनाथसंस्कृतयुनिवर्सिटी-वेरावलम्

जूनागढजनपदम्, गुजरातम् - ३६२ २६६.

दूरभाषः - ०२८७६ - २४४५३२,३३ फेक्स : २४४४१७

www.shreesomnathsanskrituniversity.orgवेरावलम्

प्रकाशकः -

डॉ. विष्णुः पुरोहितः

कुलसचिवः

श्रीसोमनाथसंस्कृतयुनिवर्सिटी-वेरावलम्

युनिवर्सिटी रोड, वेरावलम् - ३६२ २६५

जुनागढजनपदम् (गुजरात)

प्रथमं संस्करणम् - फरवरी, २०१३

प्रतयः - ३००

संकलनम् - ललितः पटेलः

पङ्कजः रावलः

मूल्यम् - २०/-

ISBN :

मुद्रकः -

एच. के ओफसेट, वेरावलम्

॥ शुभाशंसनम् ॥

विद्यायाः प्रकाशनम् बहुविधं भवति। कदाचित् अध्यापनेन, कदाचित् अध्ययनेन, कदाचित् प्रवचनेन च। परन्तु उपर्युक्ताः प्रकाशनमार्गाः अपेक्षितविद्याप्रकाशनं न कुर्वन्ति यावद्ग्रन्थप्रकाशनं विद्याप्रकाशनं जने-जने करोति। अत एवोक्तम् "पुस्तकी भवति पण्डितः"। अर्थात् यस्य पार्श्वे पुस्तकानि बहूनि विविधानि च भवन्ति स पण्डितो भवति। श्रीसोमनाथसंस्कृतविश्वविद्यालयः एकत्र तु संस्कृतभाषायाः प्रचारप्रसारक्षेत्रे समर्पितकालो वर्तते तदाऽन्यत्र नूतनसाहित्यसर्जनां कारयितुं तस्याश्च प्रकाशनं कारयितुं दत्तावधानोऽस्ति। अस्मिन्नेव शुभे पुण्ये च सन्दर्भे **'स्वर्णिमगुजरातजयन्ती'**- अवसरे तथा बेङ्गलूरुनगरे आयोजितायां **'विश्वसंस्कृतपुस्तकमेलायां'** श्रीसोमनाथसंस्कृतविश्वविद्यालयः बहूनां ग्रन्थानां प्रकाशनं करोति। साम्प्रतकाले नूतनानां गीतानां/काव्यानां निर्माणं लोकबोधाय मनोरञ्जनाय च आवश्यकम्। मन्ये अयं ग्रन्थः संस्कृतज्ञानां संस्कृतानुरागिणां च कृते महते उपकाराय भविष्यति। अस्य ग्रन्थस्य प्रसाराय अहं शुभाशंसनं प्रकटीकरोमि।

॥ जयतु सोमनाथः जयतु संस्कृतम् ॥

प्रो. पङ्कज एल. जानी

कुलपतिः

॥ अनुक्रमणिका ॥

*****

॥ गुर्जरधरे ! विभासि ॥

जय गुर्जरधरे ! विभासि।
या द्वारकेशयुतसोमनाथअम्बाजीधामविशाला
या नार्मदसारस्वतसाभ्रमतैः सलिलैः सततं पूता
या चोटीला-शत्रुंजय-पावागढगिरनारसुशैला
जय गुर्जरधरे ! विभासि।

या बृहदुपवनवनपक्षिपशूनामभयारण्यवरेण्या
सर्वधर्मसमभावसुमधुरा प्रकटितबान्धवभावा
या शिल्प-नाट्य-कविता-संगीते नित्यमाधुरीरसिता
जय गुर्जरधरे ! विभासि।

या धन्वन्तरिवत् शतधौषधिभिर्नानामृतघटहस्ता
या विश्वकर्मवत् स्वर्णचतुर्भुजमहामार्गनिर्मात्री
या कृषिगोरक्षावाणिज्यार्थं सर्वजनैः सुखसेव्या
जय गुर्जरधरे ! विभासि।

या हेमचन्द्र-सरदार-गान्धि-नरसिंह-दयानन्दार्या
या रक्षण-शिक्षण-दक्षिण-हृदयैः सन्नायकैः सुधन्या
या प्रतिगौर्जरजननिहितनिजांशा प्रतिबिम्बितजनहृदया
जय गुर्जरधरे ! विभासि।

- डॉ. राजेन्द्र नाणावटी
- डॉ. हर्षदेव माधवः
- डॉ. नरेन्द्रकुमार पण्ड्या
- प्रा. कालिदासभाई ठाकरः

***

॥ आराधयेम निजराष्ट्रम् ॥

(०) आराधयेम निजराष्ट्रम्
तनुजं हृज्जं धनजं
तनुहृद्धनजीवनजम्
आराधयेम निजराष्ट्रम्....(२)श्च

(१) अन्तर्जं मुखजं कृतिजं, श्रद्धया च विनतशिरस्काः
निश्चलनिर्मलमतिभाजः
अभिवादयेम निजराष्ट्रम्....(२)

(२) निजसहासशैशवसहितम्, निजविकसद्यौवनसहितम्,
प्रौढिमयुतजीवनसहितम्, सम्पूजयेम निजराष्ट्रम्....(२)

(३) सम्पठ्यातीतं स्वीयम्, परिवृत्त्यैतिह्यं स्वीयम्
ज्ञात्वा भवितव्यं स्वीयम्
सम्पूजयेम निजराष्ट्रम्....(२)

(४) युगयुगजा वयं स्मरामो, प्रज्वलतीरनेकघटनाः
या मातुस्सेवार्यपथे, भूत्वाऽऽयाता दुर्दमनाः

(५) अस्माभिर्या स्वभिषिक्ता, जननीरिपुशोणितकुण्डैः
मण्डिता तथास्माभिर्या, जननी रिपुगणशतमुण्डैः
अस्माभिः प्रतिष्ठिता या, सांस्कृतिक उच्चवरपीठे
यत्रारूढा साऽकार्षीत्, अनुशशास निखिलं भुवनम्
अथ कालचक्रदुर्गत्या, तद्भग्नमुच्चवरपीठम्
निजतनुहृद्वसूनि दत्त्वा, आराधयेम निजराष्ट्रम्
आराधयेम निजराष्ट्रम्....(२)

***

॥ नयनम् एतद् धन्यम् ॥

पृथिवी एषा रम्या
नयनम् एतद् धन्यम्
हरिते सस्ये रम्ये निपतति दिनकरतापः
तापः करयोः थमपि वै गृह्यते न गृह्यमाणः

व्योम इदं तु भव्यम्
गगने मेघधनुः विकसति स्फुरति
पवने रङ्गानां वर्तुलं चित्रयति,
कस्य जन्मनः पुण्यमस्ति !

जीवनं धन्यं धन्यमस्ति
समुद्र एष उच्छलति भूरि उन्नते गगने
को वेत्ति किं भरितं वारिदानां गर्भेषु
सभरमिदं शून्यमस्ति

पृथिवी एषा रम्या
मानवैः मेलापके सह मिलन् स्थितः
अन्येषां सङ्गमे
निजं कलयन् स्थितः

इदं सर्वमनन्यमस्ति
किमपि अगम्यमस्ति
धन्य-धन्य-धन्या
पृथिवी मम रम्या

- नरेन्द्रः मोदी
अनुवादकः डॉ. नरेन्द्रकुमारः पण्ड्या
मूलम-आंख आ धन्य छे.

।। श्रीसोमनाथविश्वविद्यालयकुलगीतम् ।।

(युनिवर्सिटी गीतम्)

सोमनाथेति पुण्याक्षरैः श्रीयुतो
विश्वविद्यालयो गुर्जरे राजते ।।ध्रु०।।

वेदगानेन कक्षा मुदा पूता
यज्ञधूमेन सर्व दिशश्छादिताः।
योगशिक्षादिभिः प्राङ्गणं शोभते
ब्रह्मविद्या सदा साधकैः साध्यते ।।१।। ।।ध्रु०।।

मण्डिता मन्त्रपूता सुधर्मा सभा
यत्र वेदाङ्गवेदान्तदीप्ता प्रभा।
मन्दिरस्य व्यवस्थापनं शिक्ष्यते
चिन्तने चिन्तने नूतनं सृज्यते।।२।। ।।ध्रु०।।

रम्यपाथोनिधेर्गर्जना प्राङ्गणे
सङ्गणीया कला छात्रवृन्दे नवे।
शारदासन्निधिः सन्निधिर्वर्तते ।।३।। ।।ध्रु०।।

''पूर्णता गौरवाये'' ति मुद्राङ्कितो
ज्ञानपुष्पान्वितः सत्क्रियाभूषितः।
यत्र भारं विना ध्येयलोभो भवेत्
संस्कृतेः सत्सुधा विद्यया लभ्यते।।४।। ।।ध्रु०।।

यत्र चाणक्यमेधा सदाऽध्यापने
पाणिनेस्तीव्रता कर्मयोगो हरेः।
व्यासबुद्धिर्यमो योगिनां लक्ष्यते
देशिकैर्दिव्यभाषा मुदा तन्यते।।५।। ।।ध्रु०।।

दिव्यबोधेन सद्गौर्जरी भासताम्
सौम्यसंस्कारयक्तैर्जनैर्भयताम्।
मन्त्रयन्त्रान्वितः शेवधिर्वर्धताम्
संस्कृतेनात्र नित्यं बुधैर्नन्द्यताम्।।६।। ।।ध्रु०।।

- डॉ. राजेन्द्र नाणावटी - डॉ. हर्षदेव माधवः
- डॉ. नरेन्द्रकुमार पण्ड्या - प्रा. कालिदासभाई ठाकरः

॥ स्वागतगीतम् ॥

सद्विश्वविद्यालयवरे श्रीसोमनाथे स्वागतम् ॥ध्रु०॥
ज्योतिर्मयि वसुधातले सद्भारते सद्भारते
गुणवत्सुगुर्जरराज्यविद्याधाममुकुटे संस्कृते।
श्रीमत्कनैयालालमुनशीकल्पनाङ्कुरसुरतरौ॥ १॥...ध्रु०

'गौरवाय हि पूर्णते' ति ध्येयमन्त्रसुयन्त्रिता
विश्राम्यति स्वैरं सदास्मिन् शारदा सुरभारती
ज्ञानविज्ञानस्फुरज्ज्योतिर्द्वयं विलसतितरां ॥२॥...ध्रु०

सोमेन सोमरसेन सोमकरेण सोमेशेन वै
वेदैः षडङ्गैरखिलशास्त्रैः समकलाभिः संयुते।
नित्यं हवनधूमावलीमन्त्रावलीभिर्निर्मले॥३॥...ध्रु०

गुर्जरधुरन्धरवरसुनायकयत्नतः सुविनिर्मिते
प्राणप्रतिष्ठावति यथास्मिन् विश्वकर्मविकल्पिते
ज्ञानान्विते सन्मार्गदर्शकप्रेरणाजलसिञ्चिते॥४॥...ध्रु०

वेदैः षडङ्गैरन्विते शास्त्रैः कलाभिर्भूषिते
सारस्वताः सुस्नातकानुस्नातकाश्छात्राश्च वः।
वन्दनसुचन्दनहृदयजलपाद्यासनैः संस्कृर्महे॥५॥...ध्रु०

***

॥ शृणु स्वर्णिमगुर्जरगाथाम् ॥

पठ संस्कृतभाषां सरलाम्
शृणु स्वर्णिमगुर्जरगाथाम्,
हरितंवनराजिसुरम्यं
रूचिरंरक्षितमुर्जस्वि ।
तेजस्वि तपस्वि यशस्वि
शृणु स्वर्णिमगुर्जरगाथाम् ....पठ संस्कृत ....

सलिल विमलं च सुपेयं
समये सम्प्राप्यमनल्पम् ।
ग्रामे क्षेत्रे नगरेषु
शृणु स्वर्णिमगुर्जरगाथाम्....... पठ संस्कृत ....

आवासाः शान्तिसुखेष्टाः
रमणीयाः शान्ताः दान्ताः ।
सद्धर्मसदाचारार्थाः
शृणु स्वर्णिमगुर्जरगाथाम् ....पठ संस्कृत ....

पन्थानो यत्र विशालाः
सुखदायकवाहनभव्याः ।
भुवि गगनविहारसमानाः
शृणु स्वर्णिमगुर्जरगाथाम्........ पठ संस्कृत ....

सबलं सफलं व्यक्तित्वं
जनता सच्छिक्षणदक्षा ।
व्यवसायः पारसुदर्शी
शृणु स्वर्णिमगुर्जरगाथाम् ....पठ संस्कृत ....

ग्रामे ग्रामे नगरेषु
कन्याः शिक्षणसंशीलाः ।
सर्वशिक्षणमभियानं
शृणु स्वर्णिमगुर्जरगाथाम्........ पठ संस्कृत ....

भूमिः सुखदा मातेव
मुद्रा–भरितश्च समुद्रः ।
देवराजो दिव्यदयालुः
शृणु स्वर्णिमगुर्जरगाथाम् ....पठ संस्कृत ....

नृपतिर्नृपनीतिसुदक्षः
निजराज्यप्रजासंरक्षः ।
श्रुतिपथगामी गुणरागी
शृणु स्वर्णिमगुर्जरगाथाम्.........पठ संस्कृत ....

ज्ञानरक्षा जलमुर्जा
जनता इति पञ्चसुशक्तिः व
पराम्रृतपानसुपुष्टं
शृणु स्वर्णिमगुर्जरगाथाम् ....पठ संस्कृत ....

- डॉ. नरेन्द्रकुमार एल. पण्ड्या

॥ धन्याधरागुर्जरराज्यवन्द्या ॥

धन्याधरागुर्जरराज्यवन्द्या,
धन्या प्रजागुर्जरवासभूम्याः।
सौराष्ट्र-खण्डे जगतिप्रसिद्धे,
धन्यं हरेर्धामिहरस्यतीर्थम्॥१॥

धन्योमहद्भारतवर्षदेशः,
यत्रास्ति दिव्या खलु गुर्जरीया
वसुन्धरा या सुषुवे पटेलम्,
राष्ट्रस्य रक्षाकवचं महान्तम्॥२॥

मार्गाः प्रशस्ताः जनता प्रसन्ना,
गावस्तथादुग्धपयोधिपूर्णाः।
नार्यः सुरत्नैः भरितास्तथैव
लक्ष्म्यासमृद्धाः पुरुषाः सुशीलाः॥३॥

आतिथ्यमत्रास्ति जनेषु मन्ये,
श्रद्धान्वितं दुर्लभमत्रलोके।
प्रिया च वाणी ललितः स्वभावः
समत्वभावः खलु गुर्जरस्य॥४॥

श्री सोमनाथस्यनिवासभूमि-
र्विराजते गुर्जरराज्य एव।
सिन्धोस्तटे यस्य जलाभिषेकम्,
कृत्वा जनो मोक्षपदं प्रयाति॥५॥

तद्भालकाक्षेत्रमहोविशालम्
विराजते गुर्जर-राज्य एव।
गतवा जनो पत्रविरागभावे
ह्यलौकिके वै रमते विपश्चित्॥

तत्रैवकृष्णाग्रजमूलरूपम्
हिरण्यनद्याः रचिते तटे तद्।
विलोक्यते मन्दिरचत्वरे च
कृष्णस्यलीलाविषमो विरामः॥

श्रीविश्वनाथस्य पुरं विहाय
कालो व्यतितः ममभाग्यदोषात्।
अन्यत्रदेशेन्वधिकस्ततश्च,
श्रीसोमनाथस्य पुरीं गतोऽस्मि॥

अत्रास्ति माता मम पार्वती या
सा सोमनाथं परिसेवमाना।
विराजते गुर्जरराज्यभूमौ,
तां नौमि नित्यं मनसा सदैव॥

मातः शिवे त्वं परिपाहि नित्यम्
कार्यविरोधश्च विनाशयन्ती।
जनान् सदा गुर्जरराज्यभूम्याः,
राज्यं समृद्धं कुरुते प्रसादात्॥

-प्रो. देवेन्द्रनाथ पाण्डेयः

*****

॥ स्वर्णिमगुजरातसंस्कृतमहाकुम्भः ॥

महाकुम्भं समाकर्ण्य गीर्वाणवाङ्महोत्सवम् ।
मोमुदीति मनो मान्याः। सोमनाथस्य माध्यमात् ॥१॥

विश्वविद्यालयस्यातोऽभिनन्द्या अधिकारिणः ।
निःशङ्को भविता प्राज्ञाः! महोत्सवो महाफलः ॥२॥

सामर्थ्यमस्ति कुम्भेऽस्मिन् महत्तच्छृणुत द्विजा !।
अमृतपूर्णकुम्भोऽयं कुम्भकर्णविनाशकः[१] ॥३॥

कुम्भक[२]माध्यमात् कार्येऽनन्तकुम्भ[३]फलं भवेत् ।
कुम्भजाद्याः[४] प्रशंसन्ति ऋषयः कुम्भकोत्सवम् ॥४॥

कुम्भलग्ने[५] यथा स्थैर्यं भजेयुः शारदाश्रिताः ।
संस्कृते संस्कृताश्चेति भवेयुः प्रार्थये कविः ॥५॥

स्वामिनारायणं स्वामिप्रमुखस्वामिनं तथा ।
दत्तां समागतेभ्यस्तौ स्वाशिषमृतात्मकम् ॥६॥

शान्तिः सुखं धनं कीर्तिं प्राप्नुयुः महमाध्यमात् ।
विश्वे मानवनिर्माणध्येये साफल्यमाप्नुयुः ॥७॥

- साधुः श्रुतिप्रकाशदासः

---

१. કુંભકર્ણ = આળસ, २. પ્રાણાયામ,
૩. કુંભ એક માપ, ૪. અગસ્ત્ય, વશિષ્ટ વગેરે ઋષિઓ,
૫. કુંભ રાશિનું નવમાંશ સ્થિર લગ્ન

।। बुद्बुदः ।।

उपरि निःसृत्य
तटतरून् प्रतिबिम्बितानावहन्
इन्द्रधनुषो वर्णान् विरचयन्
तरतु यावत्
वहतु किञ्चित्
तत्पूर्वमेव
स्फुटितः
बुद्बुदः।
प्रवाहस्तु
तस्य शवस्य
विराड्रूपम्।।

- राजेन्द्रः नाणावटी

।। मण्डलगानम् ।।

पश्य प्रिये!
मण्डलगाने
मध्ये निहितस्य गर्भदीपस्य
दीपस्तु निर्वापितः।
मण्डलाकारेण गच्छन्त्यः स्त्रियः
अधुना केवलं
रेखा रचयताम्
रेखा रचयताम्
कस्यचिद् अ-सत्-केन्द्रस्य
त्रिज्यामवलगताम्
बिन्दूनां निरर्थका गतिः
- शून्यं द्रढयन्ती।।

- राजेन्द्रः नाणावटी

।। गुजरातमहिमा ।।

द्वारिकाधीश स्नेहन या लालिता
सोमनाथेन या रक्षिता-पालिता।
अम्बिका-बहुचरा दृष्टि सौख्यान्विता
गुर्जरी तां नमामो वयं मङ्गलाम् ।।

पादलिप्तेश्वरा यत्र जैनालये
ज्ञानमार्गे परं दर्शयन्ति मुदा।
यत्र शत्रुंजये शान्तिराध्यात्मिकी
गुर्जरी तां स्मरामो वयं सादरम् ।।

रैवतकरम्यतां योगिभिर्दृश्यते
यत्र नवनाथदिव्यासनं राजते।
व्योम पृथ्व्या सहालापमग्नं यथा
गुर्जरी ता भजामो वयं सर्वदा ।।

- डॉ. हर्षदेव माधवः

।। भारतदेशः ।।

शोभनेयं धरा दिवयकान्तिमुर्दा ।
भारतीया जनाः सत्यशोभान्विता ।।१ ।।
भिन्नप्रान्तैर्युता जातिभिर्शोभिता ।
दिव्य नद्यः वहन्त्यः सुखानन्ददाः ।।२ ।।
स्वर्गदियं रसा रास रासान्विता ।
यत्र कृष्णेन गीता सुगीतान्विता ।।३ ।।
रामकृष्णादि यत्र जनिं लेभिरे ।
तत्र गुर्जरप्रदेशे तथाचरन् ।।४ ।।
गान्धिबाप्विति नाम्ना प्रसिद्धिंगतः ।
भारतस्यैव चाख्या जगत् विश्रुता ।।५ ।।
तेन नाम्नैव देशः सुधापूरितः ।
शुभ्रकीर्तिः सदा कामदा वर्तते ।।६ ।।
यत्र भागीरथी स्वर्गदा मोक्षदा ।
ज्ञानदा शोभते नर्मदा सर्वदा ।।७ ।।
विश्ववन्द्यः स्वसंस्कारभावात्मकः ।
विजयते सदा भूस्थले भारतः ।।८ ।।

-डॉ. वाचस्पति मिश्रः

***

।। मदीया गुर्जरधरा ।।

श्रीकृष्णचरितोज्ज्वला गांधीमाहात्म्यगौरवा
भारतैक्यानुसंधाने लोहपुरुषेण सत्सुता।
देवानामपि दुर्लभा मदीया गुर्जरधरा
भूतले कस्य न प्रिया मदीया गुर्जरधरा ? ।।१ ।।

सिद्धराजप्रशासिता हेमकाव्ययशोज्ज्वला।
सेविता कपिलादिभिः भृग्वादिभिश्च पूजिता ।।२ ।।
देवानामपि...

पावानगे महाकाली भात्युत्तरे यत्राम्बिका।
सोमनाथे शिवरूपा द्वारिकायां च शारदा ।।३ ।।
देवानामपि...

भव्या रैवतकादिभिः भूधरैरैतिहासिकैः।
कुशला विश्ववाणिज्ये रत्नाकरविभूषणा ।।४ ।।
देवानामपि...

ताप्तिः संतापहारिणी तीर्थभूवा च सरस्वती।
साभ्रमती शुभा यत्र नर्मदा शर्मदा शिवा ।।५ ।।
देवानामपि...

अर्पति राष्ट्रयज्ञे या महत्याहुतिः वै सदा।
मुक्तिदा भुक्तिदा दिव्या धन्या मे गुर्जरधरा ।।६ ।।
देवानामपि...

- डॉ. अम्बालाल प्रजापतिः

***

।। देशोऽद्वितीयो मम भारताख्यः ।।

(पवित्रता)

मौनान्मुनीनां द्विजमन्त्रघोषात्
सत्कीर्तनात् भक्तगणस्य नित्यम्।
सतां समूहाद् गुणिनां गणेभ्यो
देशोऽद्वितीयो मम भारताख्यः ।।१ ।।

(कृष्णस्मृतिः)

गीतानि गीतानि रसान्वितानि
कृतानि नृत्यानि च सुन्दराणि।
नन्दस्य नन्दस्य स्मृतौ स्मृतानि
देशोऽद्वितीयो मम भारताख्यः ।।२।।

(शस्त्रशास्त्रप्रावीण्यम्)

शस्त्रास्त्रशास्त्रार्थनयेष्वतुल्या
वृद्धा युवानो ह्यबला बलिन्यः।
भीष्मोपमा वा भरतोपमा किम् ?
देशोऽद्वितीयो मम भारताख्यः ।।३ ।।

(हृदयगतनिर्मलता)

सुमानवारांनिधितुल्यचित्ताः
ये केवलं केशगणेषु कृष्णाः।
वसन्ति यत्रामलहृन्मनुष्या
देशोऽद्वितीयो मम भारताख्यः ।।४ ।।

(मातृदेवो भव, पितृदेवो भव, आचार्यदेवो भव, अतिथिदेवो भव)

आचार्यताततिथिमातरश्च
द्विजाश्च गावो मुनयो मनुष्यैः।
नम्यन्त एतेऽमरवन्नितान्तं
देशोऽद्वितीयो मम भारताख्यः ।।५ ।।

(प्रकृतिसौन्दर्यम्)

किं नर्तकीति प्रकृतिः सशङ्का
बाल्याद्यवस्था इव सक्रमास्ते।
सदाऽनुकूला ऋतवोऽपि यत्र
देशोऽद्वितीयो मम भारताख्यः ॥६॥

(अक्षीणकोशः)

देशैरनकै बहु लुण्ठितोऽयम्
तथापि नाद्यास्ति नितान्तकोशः।
सुरासुरर्मन्थनलुण्ठितोऽपि
परं न रत्नाकर एव सिन्धुः ॥७॥

(लक्ष्मीबाई)

नारी तु नारिं न पराकरोति
ख्यातं मतं विश्वगतं कदाचित्।
सिद्धं प्रसिद्धं न मतं च लक्ष्म्यां
देशोऽद्वितीयो मम भारताख्यः ॥८॥

(स्वर्गतुलना)

स्वर्गं विहायामरनिम्नगेयम्
आगत्य धन्या धरणीतलेऽस्मिन्।
स्वर्लोकजेताऽपरनाक एषः
देशोऽद्वितीयो मम भारताख्यः ॥९॥

(भारतवन्दना)

पीतानि तोयानि परामृतानि
भुक्तानि सस्यानि च सुन्दराणि।
पुष्टाः सुतुष्टाः नितरां नमामो
देशोऽद्वितीयो मम भारताख्यः ॥१०॥

-अमृतलाल गौरीशंकर भोगायता

।। प्रेतयन्त्र (Mobile/Cell Phone) स्तोत्रम् ।।

ॐ अस्य श्रीप्रेतयन्त्रमन्त्रस्य नारद ऋषिः। मनुष्यो देवता। जाग्रत्सुषुप्तिपिञ्जिका कवचम्। सिं (SIM) बीजम्। पुनर्नवा (Recharge) शक्तिः। तारकं कीलकम्। ब्रह्माण्डसम्पर्कसिद्ध्यर्थं वृत्तकाले (Talk Time) जपे च विनियोगः।

पुराणकालतस्त्वदीयकल्पना विराजते
न नारदादिमाध्यमेन सर्वलोकचारणी।
सुतन्त्रमार्गसाधकैस्त्वमेव सम्प्रपूज्यसे
मनुष्यचित्तरञ्जकाय* प्रेतयन्त्र ते नमः ।।१।।ध्रु. ।।

सुवृत्तहारिचित्रगुप्त ! चित्रचित्रकर्मकृत् !
निवर्तयाधुना घनं मेघदूतवर्णितम्।
तथैव यक्षवृत्तमाशु सन्नयालकां प्रभो !।। मनुष्यचित्त० ।।२।।

कथं समे तवाभिधां नु पुंसि चोपयुञ्जते ?
सहस्रमूर्धवद्विभो ! विराट्स्वरूपकारणात् ?
ध्रुवं सुतत्त्वरूपतस्तु वस्तुतो नपुंसके ।। मनुष्यचित्त० ।।३।।

सभासु विघ्नकारणाय दुर्जनाय रीङ् कृतैः
स्वकीयमन्यबान्धवं प्रबोधयस्यहर्निशम्।
न मूककम्पनान्विताय कर्कशाय कर्णयोः
मनुष्यचित्तभञ्जकाय प्रेतयन्त्र ! ते नमः ।।४।।

कु-कम्प-वात-जन्यनाश-रोधनार्ह ! शक्तिमत् !
त्वयैव लुप्तबन्धुको जनो जनेन योज्यते।
त्वयैव छन्नछद्मवेषधारकः प्रकट्यते।। मनुष्यचित्तरञ्जकाय० ।।५।।

क्व चित्सुचारुकामिनीकराब्जगो विराजसे
क्व चिद्द्वितीयहृद्यथा ह्युरस्यवस्त्रकोशग !
यथा स्वलङ्कृतिर्नरस्य वित्तवत्त्वमाकलत् !।। मनुष्यचित्तरञ्जकाय० ।।६।।

भवेदशक्तिमाञ्जनः प्रवक्तुमिष्टवाचिकं
प्रियं जनं परं तथा ऋतं कटु स्फूटं यदा।
तदा त्वमेव युज्यसे परोक्षतोऽभयं मुदा॥ मनुष्यचित्तरञ्जकाय० ॥७॥

स्थले जले न केवलं विमानमध्यचारक !
न देशकालबाधया वरुध्यसे हि जातुचित्।
सभालये महार्घविक्रयालये धनालये ॥ मनुष्यचित्तरञ्जकाय० ॥८॥

गुहालये सुरालये जलालयादिकालये
ह्यपत्रपैः प्रयुज्यसे चलालयेऽचलालये।
उपग्रहे दिवानिशं कदा च भोजनालये॥ मनुष्यचित्तरञ्जकाय० ॥९॥

स्मृतिस्तवाद्भुता मनुष्यतोऽधिका भवेदहो
यतो धुरन्धरास्त्वदीयधारणे समुत्सुकाः।
रता जपं सुमालिकाक्षकैः किमु प्रकुर्वते॥ मनुष्यचित्तरञ्जकाय० ॥१०॥

(फलश्रुतिः)

य इदं प्रेतयन्त्रस्य स्तोत्रं पठति दुर्जनः।
दधि भूयात् तस्य चित्तं पितृलोकं स गच्छति॥०॥

प्राप्तुं वा
प्रकृष्टतया एतुं ज्ञातुं शक्यन्ते सन्देशा अनेन यन्त्रेणेति
उपग्रीयतरङ्गग्राहकत्वात्तेषाञ्चोपरिष्टात्प्रेत/पितृलोकस्य कल्पितत्वात्
तत्रस्थान् सन्देशान् यन्त्रयतीति वा
प्रेतात्मवदाक्रामकत्वाश्चास्य प्रेतयन्त्रत्वकल्पना।
यन्त्राणीमानि कुत्र कदा च रणरणायेरन्निति दुरुहत्व-
सादृश्याद्गौणी लक्षणेति दिक्॥

-श्री कालिदासः ठाकरः

(* अत्र 'प्रह्वे वा' इति छन्दश्शास्त्रविधानात् लघुत्वविकल्पः स्वकारि।)

॥ राजतां भारते शोभतां संस्कृतम् ॥

भारतं भा-रतं भाति लोके सदा,
संस्कृतेनैन नान्येन मन्ये ध्रुवम्।
कारणेनामराणांन्वतः संस्कृतम्,
राजतां भारते शोभतां संस्कृतम्॥

गुर्जरप्रान्तमस्मद् विधातुं दिवम्,
संस्कृते भाषणं वै प्रजाभिस्तथा।
गुर्जरीयाः युवानो वयं नूद्यताः,
श्रेष्ठयत्नेन तत् संस्कृतं रक्षितुम्॥

गुर्जरप्रान्तशोभाऽस्ति तत्संस्कृतम्,
स्पन्दनं गुर्जरस्यास्ति दिव्यं तथा।
स्पन्दताम् राज्यमस्मत्सदा वर्धताम्,
संस्कृतेनाग्रभूमिः तथा सेधताम्॥

गुर्जरप्रातनेतृत्वमार्गेण तत्,
संस्कृतं राष्ट्र-भाषा भवेत् भारते।
येन राष्ट्रं भवेद्भारतं नूत्तमः
विश्वकल्याणनीतेः प्रदाता गुरुः॥

संस्कृतिः भारतीया या, श्रेष्ठा लोके हि मन्यते।
केवलं संस्कृतं तत्र, कारणं सर्वदा स्थितम्॥

- प्रा. ललितः पटेलः
- डॉ. भावप्रकाश गांधी

***

।। श्रीसोमनाथपञ्चकम् ।।

चिदानन्दरूपं विलिङ्गस्वरुपं
दयार्द्रं कृपालुं दिनेशं गिरीशम् ।
महादेवमेकं करालाकृतिं तं
नमामि त्रिनेत्रं शिवं सोमनाथम् ।।१।।

विज्ञानार्णवं कान्तियुक्तं महेशं
समाधिस्थितं पञ्चवस्त्रं विशालम् ।
नगेन्द्रे वसन्तं च रामेश्वरं तं
नमामि त्रिनेत्रं शिवं सोमनाथम् ।। २ ।।

सुरैर्पूजितं नर्मदेशं उमेशं
गणेशस्य तातं प्रियं विश्ववन्द्यम् ।
सुभस्माम्बरं बिल्वपत्रेश्वरं तं
नमामि त्रिनेत्रं शिवं सोमनाथम् ।। ३ ।।

सुगङ्गाजरानागमालाधरं तं
हरं नीलकण्ठं भवं वैद्यनाथम् ।
सुरान् हि प्रियं शङ्करं त्र्यम्बकं तं
नमामि त्रिनेत्रं शिवं सोमनाथम् ।। ४ ।।

इमां वाग्स्वपां स्तुतिं हि पठेद्यः
शिवानन्दमाप्नोति शम्भुप्रसादात् ।
सुकैलासवासं सदा याति यः सः
नमामि त्रिनेत्रं शिवं सोमनाथम् ।।५।।

- शुक्लः राहुलः

।। राष्ट्रध्वजरूपं रुचिरम् ।।

राष्ट्रध्वजरूपं रुचिरम् ।
गुरुध्वजोऽयं देशगुरुः ।। १ ।।

नितरां गाढात् तमसो वयं स्वातन्त्र्यं ज्योतिः प्राप्ताः ।
पारतन्त्र्यपाशान्मुक्ताः पशुता पिशुनानां निहता ।। २ ।।
राष्ट्रध्वजरूपं ....

त्यागौदार्यशमादिगुणाः अनासक्तिसत्कर्मदमाः ।
काषायोऽयं रङ्गगुणः सुतरां सम्बोधयति जनान् ।। ३ ।।
राष्ट्रध्वजरूपं ....

प्रातःकाले बालरवैः या च प्रभा ह्यस्तंयाते ।
विपत्तिसम्पत्त्योः समये सूचयते समतां च सताम् ।। ४ ।।
राष्ट्रध्वजरूपं ....

तथैव काषायो रङ्गः सम्पदि विपदि समं भावम् ।
बोधयते देशस्य जनान् येन विकासः सर्वविधः ।। ५ ।।
राष्ट्रध्वजरूपं ....

शरीरवाणीमनसां नः श्वैत्यं स्वच्छत्वं सत्त्वम् ।
‘वेतगुणो ध्वजमध्यगतो बोधयते देशस्य प्रजाम् ।। ६ ।।
राष्ट्रध्वजरूपं ....

हरितो वर्णः सर्वविधां शान्तिम् ऋद्धिं सद्भावम् ।
शीतलतां शुभदृष्टिदिशां प्रतिक्षणं बोधयति सदा ।। ७ ।।
राष्ट्रध्वजरूपं ..

अशोकचक्रं केन्द्रगतं जीवनलक्ष्यमिदं सुखदम् ।
तरन्ति शोकं सत्यविदः सत्यं सद्विजयाय सदा ।। ८ ।।
राष्ट्रध्वजरूपं ....

डॉ. नरेन्द्रकुमार एल. पण्डया

॥ 'दीव' ग्रामः ॥

समुद्रजलपर्यङ्किकायां
सेतुः सुप्तः।
सूर्यः
प्राचीनदुर्गभित्तिजङ्घायां
किरणैर्नखक्षतं करोति।
तटक्षिप्तशफरीसमा
लुठन्ती चन्द्रिका
निश्चेष्टा भवति।
मद्यालयेषु
काचकूपिकामुखे
तृषा निषीदति।
'वास्को-द-गामा' इत्याख्यस्य
विदेशीयात्रिकस्य प्रतिमायाः
विस्फारितनेत्रयोः
इतिहासक्षणं स्तिमितम् अस्ति।
मात्स्यिक-जालेषु
सञ्चालनरहितं प्रातः
मत्स्यायते।
शतघ्नीमुखं जोषमास्ते।
समुद्र-जलेन
यौवनोन्मादो मिश्रितो भवति।
विश्रामगृहेषु
उष्णश्वासोच्छ्वासेषु
हृदयानि
मद्यपात्राणि भवन्ति।
तदा
दीवग्रामः
स्वप्नो भूत्वा
प्रसरति नेत्रेषु।

-डॉ. हर्षदेव माधवः

॥ नरपशुः ॥

अक्ष्णोः सम्मुखमद्य
प्रसृता निःसीमा मरुभूमिः।
मरुभूमौ उड्डयन्ते
तव स्मृतेरनन्ताः कणाः।
प्रचण्डवेगे वायौ
उत्तिष्ठति वालुकाडमरी
पूरयन्ती नेत्रे
दहन्ती
प्रदग्धसूचिका इव
विध्यन्ती रोमरोम
मध्येस्थितस्य मम,
चक्रगतिना
ऊर्ध्वमारुह्य
परित उत्तिष्ठन्ती
रचयन्ती
प्रज्वालयन्तीं सिकतास्तम्भिकाम्।
धग्धगन्तीमेतां स्तम्भिकां स्फोटयित्वा
निःसरतु साम्प्रतं झटिति
केऽपि नरपशुः।
कामं ततः सः
निजैस्तीक्ष्णैर्नखरे-
र्नान्यस्य कस्यचिद्यदि
स्वस्यैवोदरं विदार्य
अन्त्राणि निष्कर्षतु॥

- राजेन्द्रः नाणावटी

॥ सोमनाथम् ॥

पुरतः,
समुद्रो नन्दीव स्तब्धः
स्वोर्मिकर्णं चालयन्।
शिखरगवाक्षेषु
पारावतैस्सह स्वपिति तमिस्रम्।
समुद्रतटादागच्छति
जातिपुष्पधवला चन्द्रिका
सोमनाथम् अभिषिञ्चितुम्।
समुद्रजलशीकरमसृणेन पवनेन सह
मृतमीनगन्धः प्रसरत्येकतः,
जलपोतप्रकाशः
रचयति क्षितिजे
द्युतिमयं तोरणम्।
दिग्विजयद्वारात्
प्रविशन्ति मन्त्रोच्चाराः।
पाण्डुवर्णः शशाङ्करः शनैरुदेति....
दक्षशापक्षीणः सोमनाथं प्रत्यागच्छति।
*चौलादेव्या नूपुरक्वणितं
निशीथे श्रूयते,
प्रसरति
समुद्रनादे यवनशत्रोर्भीमदेवस्य धनुष्टङ्कारः।
'हमीरजी गोहिल' इत्याख्यस्य वीरस्य
रणगर्जना प्रतिध्वनति जलराशौ।
भगवान् चन्द्रशेखरः
करोति डमरूध्वनिम्
समुद्रः करोति डमरुनादम्,
सोमनाथः
कृपास्मितं करोति ज्योत्स्नासु
मम वक्षःस्थले
श्रूयते डमरुनादः,
श्रूयते वक्षः स्थले (शङ्खोदर इव) समुद्रस्वरः
एकः समुद्रो गर्जति मयि,
यः करोति डमरुनादम्,
एको नन्दी भवत्यात्मा
यस्तिष्ठति स्तब्धः
यत्र-

- डॉ. हर्षदेव माधवः

* चौलादेवी - नृत्याङ्गना, सोलंकीवंशस्य भीमदेवस्य राज्ञी

।। सरस्वतीस्तवनम् ।।

हे माहेश्वरि ! शक्तिप्रदायिनि !
मह्यं देहि ह्यपूर्वबलम् ।
येन सदाहं शक्तीभूत्वा-
विविधगुणेषु श्रेष्ठतमः ।। १ ।।

त्यक्त्वा मानं तव चरणेषु-
नित्यनिरन्तरज्ञानपरः ।
बाह्यविकारे नाहं रक्तः -
अहर्निशं त्वच्चरणे सक्तः ।। २ ।।

प्रचुरप्रवाहे धावन्-धावन् -
कथं भवेयं शास्त्रपरः ।
चित्ताकर्षी प्रायोविन्तम् -
तस्मिन् मुह्यत्यतो मनो मे ।। ३ ।।

पायं-पायं धावति नित्यं-
विविधविधासु भ्रमणरतः ।
नाहं बुद्धिप्रतिष्ठायुक्तः
तदपि सदा तव चरणासक्तः ।। ४ ।।

दीनहीन मम भावं दृष्ट्ंवा-
देहि विशुद्धं ज्ञानवरम् ।
इत्थं मातस्तवस्तवने -
. नित्यनिरन्तर श्रीचरणे ।। ५ ।।

निर्विघ्नं यदि जीवनं मे -
तदाश्रये तव पादयुगम् ।
ज्ञाने शक्ति प्रकाशं कृत्वा -
भावय मातः कमलपदम् ।। ६ ।।

- डॉ. वाचस्पतिमिश्रः

।। भारतमातुः सुतावयं ।।

भारतमातु सुतावयं भारतीं मातरं प्रणमामः।
कोटिकोटिकण्ठैरिह नित्यं गौरवगाथां गायामः।।
पन्थानो विविधा अस्माकं, विविधचिन्तनं विविधकलाः।
भाषाभूषावेशविशेषा पृथगिह सर्वेषां ललिताः
तथापि सङ्घटिता भूत्वा नन्वेकसूत्रबद्धाः यामः।
कोटिकोटि... ।।१।।

सुप्ताम् वंशजनान् कोटिशः प्रबोधयिष्यामः यूनः।
शत्रूणां ननु दुष्टविचारान् मूलत एव छेत्स्यामः।।
नूतनक्रान्तिं कृत्वा भारतभाग्यमद्य विधास्यामः।
कोटिकोटि... ।।२।।

वर्ण-जाति-गण-प्रान्तविभेदान् उच्चानीचप्रभृतीन् सर्वान्
अन्तः बाह्यं तमः हृदिस्थं झटिति हि नाशयिष्यामः।।
गीताज्ञानं हृदि निधाय दिव्यं प्रकाशमानेष्यामः।।
कोटिकोटि... ।।३।।

संस्कृतमातुः सेवां कर्तुं नैजं सर्वं दास्यामः
जीवनमिदं हि सफलं कृत्वा लोकादस्माद् यास्यामः
परमोन्नतिशिखरेष्वारुह्य, मोक्षपदं किल प्राप्स्यामः।।
कोटिकोटि... ।।४।।

आगच्छन्तु युवानः बालाः सर्वे संस्कृतपठने रता भवेम।
बालाः वृद्धाः समे मिलित्वा संस्कृतगृहं वयं रचयेम।।
इत्थं भावम् अग्रे कृत्वा सेवायै प्रतिजानीमः।।
कोटिकोटि... ।।५।।

- प्रा. रामकिशोर त्रिपाठी

।। संस्कृतगौरवम् ।।

संस्कृतं मधुरं मुख्यं संस्कृतमचलं ध्रुवम् ।
संस्कृतं सरलं दिव्यं भारते भाति संस्कृतम् ।।१ ।।

नदीषु विद्यमानासु गङ्गा चैकतमा यथा ।
विविधासु च भाषासु वरेण्यं संस्कृतं तथा ।।२ ।।

जननी प्रांतभाषाणां विवादे तरणी च तत् ।
राष्ट्रैक्यशृंखला चैव भारते भाति संस्कृतम् ।।३ ।।

संस्कृतं संस्कृतेः मूलं विश्वभाषाकुलस्य च ।
पदञ्च राष्ट्रभाषायाः शीघ्रमाप्नोतु संस्कृतम् ।।४ ।।

- डॉ. अम्बालाल प्रजापतिः

***

॥ वन्दे भारतमातरम् ॥

वन्दे भारतमातरं, वन्दे भारतमातरम्,
या जगजननी शस्य श्यामला, शुभङ्करी पूतातिनिर्मला,
सुताः कोटिशः त्वां नमन्ति, श्रद्धाभक्तिपुरस्सरम्।
वन्दे भारतमातरं, वन्दे भारतमातरम्॥

प्रोन्नत हिमगिरि दिव्य-मस्तकां, हेम-किरीट-सुशोभितभालां,
दुर्ग जलधि प्रक्षालित चरणां, धारित हरित वनाञ्चलशुभाम्,
नमन्ति देवाः सन्ततम्।
वन्दे भारतमातरं, वन्दे भारतमातरम्॥

गंगा यमुना-सिंधु नर्मदा, त्वां सिञ्चन्त्यमृतेन सर्वदा,
तव पीयूष-पवित्रित लोकाः श्रयन्ति मुक्तिं भुक्तिं च सदा।
जनिमिच्छन्ति सुरा इह स्वम्
वन्दे भारतमातरं, वन्दे भारतमातरम्॥

नैसर्गिक सुषमा सुविचित्रा, भव शंकरी शुभा सुपवित्रा,
ऋषि-मुनि शूराणां जनयित्री। उद्भव पालन प्रलयङ्कर्त्री।
तमो भ्रमं हर मामकम्।
वन्दे भारतमातरं, वन्दे भारतमातरम्॥

शक्तिशालिनी चण्डिस्वरूपा, विभव-पालिनी लक्ष्मीरूपा,
बुद्धि-दायिनी शारदारूपा, शत्रुमर्दिनी दुर्गारूपा,
रक्ष सदा तव बालकम्,
वन्दे भारतमातरं, वन्दे भारतमातरम्॥

तुभ्यमेव खलु जीवं जीवम्, तव प्रेमामृतं पायं पायम्,
तव रक्षायै धावं धावम्, दास्यापो बलिमात्मकम्,
वन्दे भारतमातरं, वन्दे भारतमातरम्॥

- प्रा. रामकिशोर त्रिपाठी

***

।। तव स्मृतिः ।।

सुघट्टिता निशीथिनी सुघट्टा तव स्मृतिः ।
स्पृशती समीरलहरीव तव स्मृतिः ।
प्रकाशय विलीना खद्योतिनी तव स्मृतिः ।
विद्युदिव चमत्कारयन्ती तव स्मृतिः ।
मेघान्निर्झरन्तो जलकणास्तव स्मृतिः ।
प्रावृण्नभोमेघसमा सरन्ती तव स्मृतिः ।
दूरादपि पर्वतस्पन्दने तव स्मृतिः ।
शिखरे ज्वलन्ती दीपशिक्षा तव स्मृतिः ।
चमत्कृत - पत्ररथ - गाने तव स्मृतिः ।
रजनीगन्धाया मन्दताने तव स्मृतिः ।
पर्णमर्मरे पुनर्वलिता एव स्मृतिः ।
स्पृशति प्रत्यङ्गं पुनः पुनस्तव स्मृतिः ।
अणावणौ पृथिव्या भ्रमन्ती तव स्मृतिः ।
मनस एकान्तनिष्यन्दिनी तव स्मृतिः ।
सुघट्टितो निशीथोऽयं यथा तव स्मृतिः ।

- राजेन्द्रः नाणावटी

ISBN -

Shree Somnath Sanskrit University - Veraval.
Veraval- 362 266, Dist : Junagadh (Guj.) India
Phone : 02876 - 244528, 29, 32 Fax : 244417
e-mail : sssu.veraval@gmail.com,
www.shreesomnathsanskrituniversity.info